শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্ভাগৱতে দশমস্কন্ধে

# ॥ শ্রী ভ্রমরগীতম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী ভ্রমরগীতম্ ॥

গোপ্যুৱাচ

মধুপ কিতৱবন্ধো মা স্পৃশাঙ্ঘ্রিং সপত্ন্যাঃ
    কুচৱিলুলিতমালাকুঙ্কুমশ্মশ্রুভির্নঃ।
ৱহতু মধুপতিস্তন্মানিনীনাং প্রসাদং
    যদুসদসি ৱিডম্ব্যং যস্য দূতস্ত্ৱমীদৃক্ ॥ **1** ॥

সকৃদধরসুধাং স্ৱাং মোহিনীং পাযযিৎৱা
    সুমনস ইৱ সদ্যস্তত্যজেঽস্মান্ ভৱাদৃক্।
পরিচরতি কথং তৎপাদপদ্মং নু পদ্মা
    হ্যপি বত হৃতচেতা উত্তমশ্লোকজল্পৈঃ ॥ **2** ॥

কিমিহ বহু ষডঙ্ঘ্রে গাযসি ৎৱং যদূনাম্
    অধিপতিমগৃহাণামগ্রতো নঃ পুরাণম্।
ৱিজযসখসখীনাং গীযতাং তৎপ্রসঙ্গঃ
    ক্ষপিতকুচরুজস্তে কল্পযন্তীষ্টমিষ্টাঃ ॥ **3** ॥

দিৱি ভুৱি চ রসাযাং কাঃ স্ত্রিযস্তদ্দুরাপাঃ
    কপটরুচিরহাসভ্রূৱিজৃম্ভস্য যাঃ স্যুঃ।
চরণরজ উপাস্তে যস্য ভূতির্ৱযং কা
    অপি চ কৃপণপক্ষে হ্যুত্তমশ্লোকশব্দঃ ॥ **4** ॥

ৱিসৃজ শিরসি পাদং ৱেদ্ম্যহং চাটুকারৈঃ
    অনুনযৱিদুষস্তেঽভ্যেত্য দৌত্যৈর্মুকুন্দাৎ।

স্বকৃত ইহ ৱিসৃষ্টাপত্যপত্যন্যলোকা
ৱ্যসৃজদকৃতচেতাঃ কিং নু সন্ধেযমস্মিন্ ॥ **5** ॥

মৃগযুরিৱ কপীন্দ্রং ৱিৱ্যধে লুব্ধধর্মা
স্ত্রিযমকৃত ৱিরূপাং স্ত্রীজিতঃ কামযানাম্।
বলিমপি বলিমত্ত্বাৱেষ্টযদ্ ধ্ৱাঙ্ক্ষৱদ্ যঃ
তদলমসিতসখ্যৈর্দুস্ত্যজস্তৎকথার্থঃ ॥ **6** ॥

যদনুচরিতলীলাকর্ণপীযূষৱিপ্রুট্ -
সকৃদদনৱিধূতদ্ৱন্দ্ৱধর্মা ৱিনষ্টাঃ।
সপদি গৃহকুটুম্বং দীনমুৎসৃজ্য দীনা
বহৱ ইহ ৱিহঙ্গা ভিক্ষুচর্যাং চরন্তি ॥ **7** ॥

ৱযমৃতমিৱ জিহ্মৱ্যাহৃতং শ্রদ্দধানাঃ
কুলিকরুতমিৱাজ্ঞাঃ কৃষ্ণৱধ্ৱো হরিণ্যঃ।
দদৃশুরসকৃদেতত্তন্নখস্পর্শতীৱ্র -
স্মররুজ উপমন্ত্রিন্ ভণ্যতামন্যৱার্তা ॥ **8** ॥

প্রিযসখ পুনরাগাঃ প্রেযসা প্রেষিতঃ কিং
ৱরয কিমনুরুন্ধে মাননীযোঽসি মেঽঙ্গ।
নযসি কথমিহাস্মান্ দুস্ত্যজদ্ৱন্দ্ৱপার্শ্ৱং
সততমুরসি সৌম্য শ্রীর্ৱধূঃ সাকমাস্তে ॥ **9** ॥

অপি বত মধুপুর্যামার্যপুত্রোঽধুনাস্তে
স্মরতি স পিতৃগেহান্ সৌম্য বন্ধূংশ্চ গোপান্।
ক্ৱচিদপি স কথা নঃ কিঙ্করীণাং গৃণীতে
ভুজমগুরুসুগন্ধং মূর্ধ্ন্যধাস্যৎ কদা নু ॥ **10** ॥

॥ ইতি শ্রী ভ্রমরগীতং সমাপ্তম্ ॥